International Journal of Sanskrit Research 2021; 7(4): 28-32

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 28-32
© 2021 IJSR
www.anantaajournal.com
Received: 03-05-2021
Accepted: 15-06-2021

**श्रीगौतमकुमारराजहंसः**
सहायकशिक्षकः, रा.क.उ.
विद्यालयः, चुल्हिया,
मोहनपुरम्, देवघरः,
झारखण्डम्, भारत

Corresponding Author:
**श्रीगौतमकुमारराजहंसः**
सहायकशिक्षकः, रा.क.उ.
विद्यालयः, चुल्हिया,
मोहनपुरम्, देवघरः,
झारखण्डम्, भारत

# भाषाविज्ञानदृष्ट्या संस्कृतसन्धिपदानां विश्लेषणम्

**श्रीगौतमकुमारराजहंसः**

## प्रस्तावना

भाष् व्यक्तायां वाचि इत्यस्माद्धातोः गुरोश्चहलः[1] इति सूत्रेण अ प्रत्यये स्त्रीत्वविवक्षायां टापि सुपि च कृते भाषेति पदनिष्पत्तिः।

भाष्यते व्यक्तवाग्रूपेण अभिव्यज्यते इति भाषा। भाषायाः लक्षणमेवमपि वक्तुं शक्यते –

स्फुटवाक्करणोपात्तो भावाभिव्यक्तिस्साधकः।
सङ्केतितो ध्वनिव्रातः सा भाषेत्युच्यते बुधैः [2]।।

सामान्यतो वक्तुं शक्यते यत् – येन साधनेन मानवः परस्परं भावाभिव्यक्तिङ्करोति सा भाषा इति। पाश्चात्यभाषाशास्त्रिणां मते तु –

A language is a system of arbitrary vocal symbol by means of which social groups cooperate [3].

अर्थात् भाषा यादृच्छिक –वाचिक-ध्वनिसंकेतानामेका प्रणाली वर्तते यया मानवः परस्परं विचारविनिमयं कुरुते। इयं भाषैव समग्रप्रपञ्चस्य सर्वोत्तमा ज्योतिः, या मानवस्य अन्तः-करणान्धकारं दूरीकरोति। अनयैव संसारस्य अखिलानि कार्याणि प्रवर्तन्ते। नेदं कल्पयितुं शक्येत यद् भाषामन्तरा मानवस्य का गतिरभविष्यत्? इति।

कस्यापि भाषायाः साधुस्वरूपमवगन्तुं तस्याः व्याकरणं सरलं स्पष्टञ्च साधनं भवति। व्याकरणेनैव भाषा सुव्यवस्थिता परिष्कृता च तिष्ठति। लौकिकवैदिकोभयविधसाहित्यस्य यथार्थबोधः व्याकरणाधीनो वर्तते।

यथा भाषा नियमान् ज्ञातुं व्याकरणज्ञानमनिवार्यं, तथैव व्याकरणनियमानां ज्ञानार्थं भाषायाः आन्तरिकस्वरूपस्य व्याख्यायै च भाषा विज्ञानस्य अनिवार्यता वर्तते। वस्तुतस्तु कस्या अपि भाषायाः वैज्ञानिकदृष्ट्या स्वरूपनिर्धारणं भाषाविज्ञानेनैव सिध्यति।

## भाषाविज्ञानस्य परिभाषाः –

भाषायाः विज्ञानं भाषाविज्ञानं किं वा भाषाविज्ञानं नाम यत्र भाषाविषयकं सर्वविध-विवेवचनात्मकमध्ययनं प्रस्तूयते तदेव भाषाविज्ञानमिति। तथा हि –

---

1 अ.सू. 3.3.102

2 भा. व,भा.शा पृ.30

3 Outlines of linguistic analysis, B.Bloch & G.L. Trager, P.5

भाषायाः यत्तु विज्ञानं सर्वाङ्गं व्याकृतात्मकम्।
विज्ञानदृष्टिमूलं तत् भाषाविज्ञानमुच्यते।।[4]

भाषाविज्ञानमपि विज्ञानस्यांशभूतं वर्तते। भाषाविज्ञानस्य विचारेण भाषाणां निदानं सुतरां ज्ञायते। यतो हि तत्र भाषा कथमागता ? कुतः आगता ? कस्माज्जाता ? स्वाभाविकी अस्वाभाविकी वा ? इयं भाषा सृष्टेः प्रागासीन्न वा ? अथवा तदनन्तरं मानवैर्निर्मिता ? नित्यानित्या वा ? इयं भाषा विभिन्नेषु देशेषु कथं भिद्यते ? देशेष्वपि भिन्न-भिन्न प्रदेशेषु कथं भिद्यते का प्रकृतिः ? कश्च प्रत्ययः ? पूर्वं व्याकृता अव्याकृता वेति बहुविधाः प्रश्नाः जायन्ते। अमीषां प्रश्नानामुत्तराणि पाश्चात्यैर्भारतीयैर्वा भाषाविज्ञानविद्भिर्यथावसरं दीयन्ते। अतः भाषाविज्ञानमन्तरा भाषाणां मूलभूतं रहस्यं कदापि ज्ञातुं न शक्यते।

**भारतीयं भाषाविज्ञानम् –**

संस्कृतवाङ्मये निरुक्तं, व्याकरणं, शिक्षा चेति वेदाङ्गत्रये भाषावयवानां शब्दानां निर्वचनं सम्यक्तया उपलभ्यते। अत्र भाषाविज्ञानस्य प्राचीनं नाम तु निरुक्तं, निर्वचनं, शब्दशास्त्रमिति ज्ञायते। निरुक्तन्तावच्छब्दानान्निर्वचनङ्करोति। तत्र प्रकृति प्रत्ययादीनां विवेचनं, कथं वा तत्तदर्थेषु शब्दानां शक्तिग्रहस्य त्यागः भवतीति विचारः क्रियते। अत्र अव्युत्पन्नानां शब्दानां साधुत्वमपि प्रदर्शितं दृश्यते। निरुक्ते शब्दानां साधुत्वन्निर्वचनं वा पञ्चधा क्रियते-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ।।[5]

**अथ च –**

भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढोऽऽत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।।[6]

अत इदं सिद्ध्यति यत् –निरुक्तं भाषाविज्ञानमेव। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। एतदर्थमेव संस्कृतव्याकरणस्य जनिरभूत्। संस्कृतव्याकरणावबोधाय पाणिनिविरचिताष्टाध्यायी प्राधान्यं स्थानमावहति। पाणिनीयसूत्रेषु कात्यायनेन वार्तिकाणि महर्षिणा पतञ्जलिना च भाष्याणि विरचितानि। अतो मुनित्रयविरचितमिदं व्याकरणं त्रिमुनिव्याकरणनाम्ना प्रसिद्धिमगात्।व्याकरणं हि साक्षात् भाषाविज्ञानपदं लब्धुन्नार्हति, यतो हि व्याकरणं भाषाणां सिद्धस्वरूपं बोधयति। भाषाविज्ञानं तु तन्मूलं किमिति विचारयति। व्याकरणं सर्वथा भाषास्वरूपसङ्घटनाय न व्याक्रियते अपि तु भाषावयवभूतानि पदानि व्याकरोति। यद्यपि महर्षिः पाणिनिः सूत्रेषु क्वचित्-क्वचित् भाषाविज्ञानांशानपि निवेशितवान् तथापि तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्यं स्वार्थसाधकं च इत्यादि निरुक्तवचनेन स्पष्टं भवति यत् व्याकरणं भाषाविज्ञानमनुसरतीति।

**भाषाविज्ञानस्य भेदाः-**

तुलनात्मकभाषाविश्लेषणे भाषाज्ञानस्य मुख्यतः चत्वारि अङ्गानि स्वीक्रियन्ते। तानि च –

1. ध्वनिविज्ञानम्-(Phonology)
2. पदविज्ञानम् (Morphology)
3. वाक्यविज्ञानम्(Syntax)
4. अर्थविज्ञानम्(Semantics)

अत्र मम विवेच्यविषयः पदविज्ञानस्य रूपस्वनिमविज्ञाने अन्तर्भवति।

**संस्कृतभाषायां रूपस्वनिमविज्ञानम् –**

स्वनिमविज्ञानं रूपविज्ञानस्य पदविज्ञानस्य वा एका विशिष्टा शाखा विद्यते। आङ्गलभाषायामेतत् Morphophonemic's इति कथ्यते। अस्यार्थो भवति यत् द्वयोः शब्दयोः संयोगेन जायमानस्य परिवर्तनविशेषस्य अध्ययनमिति। संस्कृत इदं सन्धिरितिपदेन स्पष्टं ज्ञायते। शब्दे रूपे पदे वा जायमानम् सर्वविधं परिवर्तनं सन्धावन्तर्भवन्ति। Morphophonemic's शब्दः दीर्घः अस्ति।किञ्च संस्कृतस्य सन्धिशब्दः लघुतरः, अतः पाश्चाद्विद्वद्भिरपि अयं शब्दः स्वीकृतः। सूक्ष्मतया विवेचयामश्चेत् मार्फोफोनीमिक्स इतिशब्दस्य कृते सन्धिशब्दः न प्रयोक्तव्यः। यतो हि – सन्धिशब्दः केवलं स्वर-व्यञ्जन-विसर्गसन्धीनामेव सामान्य- तया बोधं कारयति। मार्फोफोनीमिक्स शब्दस्तु न केवलं स्वरादिसन्धीन् बोधयति अपि तु तत्र जायमानं ध्वनिसम्बन्धीसमस्तपरिवर्तनमपि ज्ञापयति। अतोऽत्र सन्धेः स्थानेः संस्कृतस्यैव संहिता इति पदं निरन्तरमुपयुक्तं प्रतिभाति। वर्णानामतिशयितः सन्निधिः संहिता इति । परः सन्निकर्षः संहिता [7]

[4] भा. व.भा.शा. पृ 06

[5] नि.रु.1.1.1

[6] वै. स.कौ.समासाश्रयप्रकरणे (पृषोदरादीनि यथोपदिष्टम्- 06.03.109)

[7] पा.सू. 1.4.109

**संस्कृतस्य सन्धयः –**

भाषाशास्त्रदृष्ट्या संस्कृतस्य सन्धयः निम्नरीत्या प्रस्तोतुं शक्यन्ते। अत्र पारम्परिक- व्याकरणनामानि अकृत्वा शब्दपरिवर्तनदृष्ट्या नामानि कर्तुं शक्यन्ते –

**1. गुणीकरणम् –**

यत्र भिन्नस्थानीयह्रस्वदीर्घस्वरयोः संयोगेन एकस्य स्वतन्त्रस्वरस्य विकासो जायते तद् गुणीकरणं कथ्यते। यथा – देव+इन्द्रः = देवेन्द्रः= अ+इ =ए । सूर्य+उदयः = सूर्योदयः – अ+उ = ओ। राज+ऋषिः= राजर्षिः- अ+ऋ = अर्[8]।

**2. वृद्धीकरणम् –** अत्र भिन्नस्थानीयस्वरध्वन्योः मेलनेन एकस्य स्वतंत्रस्वरध्वनेः विकासो जायते। यथा – तत्र+एकः= तत्रैकः – अ+ए = ऐ। जल+ओघः = जलौघः- अ+ओ= औ । उप+ऋच्छति = उपार्च्छति । प्र+एति =प्रैति[9]।

**3. दीर्घीकरणम् –** समस्थानीयध्वन्योः मेलनेन एकस्य दीर्घस्वरस्योत्पत्तिः भवति। यथा – गिरि+ईशः= गिरीशः – इ+ई= ई,। भानु+उदयः= भानूदयः उ+उ= ऊ। दैत्य+अरिः= दैत्यारिः अ+अ= आ[10]।

**4. पूर्वरूपम् –**

समस्य विषमस्य वा स्वरद्वयस्य मेलनेन केवलं पूर्वस्वर एव यत्रावशिष्यते तत्पूर्वरूपम्भवति। यथा – राम+अम् = रामम्, हरि+अम् = हरिम्, हरे+अव= हरेऽव विष्णो+अव = विष्णोऽव, हरे+अः= हरेः[11]।

**5. पररूपम् –** समस्य विषमस्य वा स्वरद्वयस्य संयोगेन केवलं परवर्तीस्वरः एव यत्रावशिष्यते तत्पररूपम् इति कथ्यते। यथा – प्र+एजते = प्रेजते – अ+ए = ए, उप+ओषति = उपोषति अ+ओ = ओ[12] ।

**6. प्रकृतिभावः –** विशेषावस्थायां सन्ध्यभावः एव प्रकृतिभावः। प्रकृत्या स्वभावेनावस्थिता भवतीति प्रकृतिभावः। सन्धिर्नभवतीत्याशयः। प्रकृतिभावस्य अनेकान्युदाहरणानि मिलन्ति। यथा – हरी+एतौ= हरी+एतौ, विष्णू+इमौ= विष्णू इमौ, अमी+ईशाः =अमी ईशाः, इ इन्द्रः, उ उमेशः, अहो ईशाः[13]।

**7. व्यञ्जनीकरणम् –** व्यञ्जनीकरणं द्विविधम्-

(क) पूर्णव्यञ्जनीकरणम्। यथा- इकः स्थाने यण् स्यादचि संहितायां विषये- इको यणचि इति सूत्रेण। यथा - प्रति+एकम् =प्रत्येकम्, अनु+अयः =अन्वयः,

(ख) अपूर्णव्यञ्जनीकरणम् - एचः क्रमादयवायाव एते स्युरचि[14]। यथा – हरे+ए = हरये, विष्णो+ए =विष्णवे, नै+अकः =नायकः, पौ+अकः= पावकः।

**8. स्वरीकरणम् –** व्यञ्जनस्य स्थाने स्वरस्यादेशः स्वरीकरणं कथ्यते। यथा- कः+अयं =कोऽयम्, रामः+गच्छति = रामो गच्छति।

**9. अघोषीकरणम् –** घोषवर्णस्य स्थाने अघोषवर्णानां स्थापनम् अघोषीकरणम् उच्यते। यथा – तद्+परः= तत्परः, उद्+ स्थानम्= उत्थानम् ।

**10. घोषीकरणम् –** अघोषस्य स्थाने घोषस्य स्थापनं घोषीकरणम्। यथा – जगत्+ ईशः= जगदीशः, अच्+अन्तः = अजन्तः, सुप्+अन्तः = सुबन्तः, अप्+धिः = अब्धिः[15]।

**11. अल्पप्राणीकरणम् –** महाप्राणध्वनेः स्थाने अल्पप्राणध्वनिकरणम् अल्पप्राणीकरणम् कथ्यते। यथा – शुध्+ धिः= शुद्धिः, दुध्+धम्= दुग्धम्[16],

**12. महाप्राणीकरणम् –** अत्र अल्पप्राणध्वनीनां स्थाने महाप्राणध्वनयः स्थाप्यन्ते। यथा – बुध्+ भ्याम्= भुद्ध्याम्[17]।

---

[8] आद्गुणः 6.1.87, उरण् रपरः 1.1.51

[9] वृ द्धरे च 6.1.88, एत्येधत्यूठसु 6.1.89, उपसर्गादृति धातौ 6.1.91

[10] अकः सवर्णेदीर्घः 6.1.101

[11] अ म पूर्वः 6.1.107, एङः पदान्तादति 6.1.109, ङ स ङसोश्च 6.1.1010

[12] ए ङ पररूपम् 6.1.94

[13] प्लुतप्रगृह्या अ च नित्यम् 6.1.125, अदसो मात् 1.1.12, निपात एकाजनाङ् 1.1.14, ओत् 1.1.15

[14] एचोऽयवायावः 6.1.78,

[15] झलां जशोऽन्ते 8.2.39, झलां जश् झ श 8.4.53

[16] झलां जश् झ श8.4.53

[17] एकाचो बशो भष् झशन्तस्य स्ध्वोः 8.2.37

**13. नासिकीकरणम्** – यदा अनासिक्यध्वनयः नासिक्याः क्रियन्ते तदा नासिकीकरणमित्युच्यते। यथा – तत्+ मयम् = तन्मयम्, यत् +न = यन्न, वाक् +मयम् = वाङ्मयम्, किम्+ करोति = किङ्करोति, मन्+ स्यते = मंस्यते[18]।

**14. समीकरणम्** – द्वयोः विषमव्यञ्जनध्वनयोरेकीकरणम् एकस्थानीकरणं वा समीकरणं वक्तुं शक्यते। समीकरणस्य बह्वो भेदाः सन्ति-

(क) **तालव्यीकरणम् (श्चुत्वसन्धिः)** – स्>श् – हरिस् +शेते = हरिश्शते, रामः+ च = रामश्च, द् >ज् – सद्+ जनः= सज्जनः,त्> च् – सत्+ चित्= सच्चित्, न् >ञ् – तान् +चतुरान् =ताञ्चतुरान्, उपरितनेषूदाहरणेषु स्पष्टतया द्रष्टुं शक्यते यत् यदि तालव्यध्वनयः पूर्वं पश्चाद्वा भवन्ति तदा समीपस्थः स् तवर्गो वा तालव्यध्वनिरूपेण परिवर्तितो भवति[19]।

(ख) **मूर्धन्यीकरणम् (ष्टुत्वसन्धिः)-** मूर्धन्यध्वनेः षकारात् टवर्गात् च पूर्वं पश्चाद्वा सकारः तवर्गो वा भवति तदा सः सकारः तवर्गो वा मूर्धन्यषकाररूपेण टवर्गत्वेन च परिवर्तितो भवति। यथा – रामः+ षष्ठः = रामष्षष्ठः, दुष् +तः= दुष्टः, हृष्+ तः= हृष्टः, पुष्+ तः= पुष्टः, उत् +डीनः =उड्डीनः, विष्+ नुः= विष्णुः, कृष् +नः= कृष्णः[20],

(ग) **पूर्वसवर्णः** – एतत्पुरोगामीसमीकरणमपि वक्तुं शक्यते। पूर्वध्वनेः आधारेण परवर्तीव्यञ्जनध्वनेः पूर्वध्वनिवत् परिवर्तनमेव पूर्वसवर्णत्वं भवति। यथा – उद्+ स्थानम् = उत्थानम्, वाक्+ हरिः= वाग्घरिः, तद्+ हितः =तद्धितः[21]

(घ) **परसवर्णः** – परवर्तीध्वनेराधारेण पूर्ववर्तीध्वनौ परिवर्तनं पश्चाद्गामीसमीकरणं परसवर्णत्वं वा उच्यते। यथा – तद्+ लीनः= तल्लीनः, पद्+ लवः= पल्लवः, नकारस्यानुनासिकः लः- विद्वान् +लिखति =विद्वांल्लिखति, अं +कः= अङ्कः, शां+ तः= शान्तः[22],

(ङ) **अनूष्मीकरणम्** – ऊष्माणः अनूष्माणः यदा क्रियन्ते तदा अनूष्मीकरणं भवति। यथा – तत् +शिवः= तच्छिवः, रामस् >रामः[23]।

(च) **ऊष्मीकरणम्** – यदा अनूष्माणः ऊष्माणत्वेन विधीयन्ते तदा ऊष्मीकरणं जायते। यथा – विसर्गस्य (ः) स्,श्,ष् रूपेण परिवर्तनम्। रामः + त्राता= रामस्त्राता, हरिः+ शेते = हरिश्शेते, आविः+ कृतम् = आविष्कृतम्, दुः+= कृतम् दुष्कृतम्, कान्+ कान् = कांस्कान्, [24]

**16. विषमीकरणम्** – समानध्वन्योः एकं विशेषतः पूर्वतनं ध्वनिं विषमध्वनिरूपेण परिवर्तनं विषमीकरणं कथ्यते। यथा – युध्+ धम् = युद्धम्, बुध् +धिः= बुद्धिः, उद्थ्+ थानम् =उत्थानम्[25]

**17. अनासिकीकरणम्** – नासिक्याः अनासिक्याः क्रियन्ते यदा तदा अनासिकीकरणं भवति। यथा – कान् +कान्= कांस्कान्, कस्मिन्+ चित्= कस्मिंश्चित्, पुम्+ कोकिलः =पुंस्कोकिलः[26]।

**18. ह्रस्वीकरणम्** – द्वयोः विषमध्वनयोः मेलनेन पूर्ववर्तीस्वरस्य ह्रस्वत्वमेव ह्रस्वीकरणं कथ्यते। यथा – चक्री +अत्र = चक्रि अत्र, ब्रह्मा +ऋषिः= ब्रह्म ऋषिः, सुधी +औ= सुधियौ, कटप्रू+ औ = कटप्रुवौ[27]।

**19. आगमः** – द्वयोर्विषमध्वन्योर्मध्ये स्वरस्य व्यञ्जनस्य वा आगमनम् आगमः। यथा- गो +इन्द्रः= गवेन्द्रः, ओ >अव,

---

[18] यरोऽनुना सकेऽनुना सको वा 8.4.45, मोऽनुस्वारः 8.3.23, नश्चापदान्तस्य झ ल 8.3.24

[19] स्तोः श्चुना श्चुः 8.4.40

[20] ष्टुना ष्टुः 8.4.41

[21] उदः स्थास्तम्भोः पूर्वस्य 8.4.61, झयो होन्यतरस्याम् 8.4.62

[22] तो र्लिः8.4.60, अनुस्वारस्य ययि परसवर्णः 8.4.58, वापदान्तस्य 8.4.59

[23] शश्छोऽटि8.4.63

[24] वसर्जनीयस्य सः 8.3.34, ईदुदुपधस्य चाऽप्रत्ययस्य 8.3.41, कानाम्रे डते 8.4.59

[25] झलं जशझ श 8.4.53, खरि च 8.4.55

[26] कानाम्रे डते 8.3.12, नश्छव्यप्रशान् 8.3.7, पुमः खय्यमपरे 8.3.6

[27] इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च 6.1.127, ऋत्यकः 6.1.127, अ च श्नुधातुभ्रुवां य्वोरिवङुवङौ 6.4.77

तस्मिन्+ इति= तस्मिन्निति, प्रत्यङ्+ आत्मा =प्रत्यङ्ङात्मा, षट्+ सन्तः =षट्त्सन्तः, वृक्ष+ छाया = वृक्षच्छाया[28]।

**20. लोपः** - लोपोऽयमनेकविधः अस्ति। यथा – समस्वरलोपः, विषमस्वरलोपः, एकस्यानेकस्य वा व्यञ्जनस्य लोपः, स्वरव्यञ्जनसमूहस्य लोपः, समाक्षरलोपश्च। पूर्वरूपे पररूपे च पूर्वपरयोः स्वरध्वनेः लोपः अस्ति। अन्यत्र च मनस्+ ईषा= मनीषा, हरय +इह= हर इह, देवाय+ गच्छन्ति= देवा गच्छन्ति, पुनर्= राजते पुना राजते[29]।

**21. द्वित्वम्** – कस्यचित् व्यञ्जनध्वनेः द्विवारं पठनं द्वित्वं भवति। यथा – कर्+ तव्यम् =कर्त्तव्य,कार्+ यम्= कार्य्यम्, गौय्यौं[30]।

इत्थं भाषाविज्ञानदृष्ट्या संस्कृतव्याकरणस्य समस्तवर्गाणां विश्लेषणं कृत्वा तेषां मूलभूतं रहस्यं विज्ञातुं शक्यते।

**सन्दर्भग्रन्थसूची-**


1. अष्टाध्यायी- पाणिनिः, शिवसंस्कृतसंस्थानम्, वाराणसी, 2003.
2. निरुक्तम् – सम्पादकः, प्रो. उमाशंकरशर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी, 1989.
3. भाषाविज्ञान एवं भाषाशास्त्र – डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, 2010.
4. भाषाविज्ञान तथा लिपिविज्ञान – प्रो. ब्रह्मचारी सुरेन्द्र कुमार, नालंदा मुक्त विश्वविद्यालय, पटना, 2009.
5. लघुसिद्धान्तकौमुदी- पं.सदाशिवशास्त्री, चौखम्बा संस्कृत सीरीज, वाराणसी, 2014.
6. वैयाकरणसिद्धान्तकौमुदी – डा. अर्कनाथ चौधरी, जगदीश संस्कृत पुस्तकालय, जयपुर, 2015.
7. संस्कृतभाषाविज्ञानम् – चक्रवर्ती श्रीरामाधीन चतुर्वेदी, चौखम्बा विद्याभवन, वाराणसी, 2011
8. Linguistic Analysis of Paninian Grammar – Dr. Shashibhushan Mishra, the Banaras Mercantile Co. Kolkata, 2012.
9. Outlines of linguistic analysis, B. Bloch & G.L.Trager, Linguistic Society of America, 1942.


[28] इन्द्रे च 6.1.124, ङमो ह्रस्वाद च ङमुण्नित्यम् 8.3.32, ङः स धुट् 8.3.29, छे च 6.1.73

[29] शकन्ध्वादिषु पररूपं वाच्यम्(वा.), हलो यमां य म लोपः 8.4.64, लोपः शाकल्यस्य 8.3.19, ह ल सर्वेषाम् 8.3.22, रोरि 8.3.14

[30] अचो रहाभ्यां द्वे 8.4.46,